श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ एकादशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ एकादशः सर्गः ॥

## नासौ सीतेति निश्चित्य हनुमता पुनरन्तःपुरे पानभूमौ च सीताया अनुसन्धानं तन्मनसि धर्मलोपाशङ्का तस्याः स्वतो निवारणं च

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा।
जगाम चापरां चिन्तां सीतां प्रति महाकपिः ॥ **5.11.1** ॥

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी।
न भोक्तुं नाप्यलङ्कर्तुं न पानमुपसेवितुम् ॥ **5.11.2** ॥

नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम्।
न हि रामसमः कश्चिद् विद्यते त्रिदशेष्वपि ॥ **5.11.3** ॥

अन्येयमिति निश्चित्य भूयस्तत्र चचार सः।
पानभूमौ हरिश्रेष्ठः सीतासन्दर्शनोत्सुकः ॥ **5.11.4** ॥

क्रीडितेनापराः क्लान्ता गीतेन च तथापराः।
नृत्येन चापराः क्लान्ताः पानविप्रहतास्तथा ॥ **5.11.5** ॥

मुरजेषु मृदङ्गेषु चेलिकासु च संस्थिताः।
तथाऽऽस्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ॥ **5.11.6** ॥

अङ्गनानां सहस्रेण भूषितेन विभूषणैः।
रूपसंलापशीलेन युक्तगीतार्थभाषिणा ॥ **5.11.7** ॥

देशकालाभियुक्तेन युक्तवाक्याभिधायिना।
रताधिकेन संयुक्तां ददर्श हरियूथपः ॥ **5.11.8** ॥

अन्यत्रापि वरस्त्रीणां रूपसंलापशायिनाम्।
सहस्रं युवतीनां तु प्रसुप्तं स ददर्श ह॥ **5.11.9**॥

देशकालाभियुक्तं तु युक्तावाक्याभिधायि तत्।
रताविरतसंसुप्तं ददर्श हरियूथपः॥ **5.11.10**॥

तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः।
गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः॥ **5.11.11**॥

स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम्।
करेणुभिर्यथारण्ये परिकीर्णो महाद्विपः॥ **5.11.12**॥

सर्वकामैरुपेतां च पानभूमिं महात्मनः।
ददर्श कपिशार्दूलस्तस्य रक्षःपतेर्गृहे॥ **5.11.13**॥

मृगाणां महिषाणां च वराहाणां च भागशः।
तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः॥ **5.11.14**॥

रौक्मेषु च विशालेषु भाजनेष्वप्यभक्षितान्।
ददर्श कपिशार्दूलो मयूरान् कुक्कुटांस्तथा॥ **5.11.15**॥

वराहवाध्रीणसकान् दधिसौवर्चलायुतान्।
शल्यान् मृगमयूरांश्च हनुमानन्ववैक्षत॥ **5.11.16**॥

कृकलान् विविधांश्छागाञ्छशकानर्धभक्षितान्।
महिषानेकशल्यांश्च मेषांश्च कृतनिष्ठितान्॥ **5.11.17**॥

लेह्यानुच्चावचान् पेयान् भोज्यान्युच्चावचानि च।
तथाम्ललवणोत्तंसैर्विविधै रागखाण्डवैः॥ **5.11.18**॥

महानूपुरकेयूरैरपविद्धैर्महाधनैः।
पानभाजनविक्षिप्तैः फलैश्च विविधैरपि॥ **5.11.19**॥

कृतपुष्पोपहारा भूरधिकां पुष्यति श्रियम्।
तत्र तत्र च विन्यस्तैः सुश्लिष्टशयनासनैः ॥ **5.11.20** ॥

पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते।
बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः ॥ **5.11.21** ॥

मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक्।
दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि ॥ **5.11.22** ॥

शर्करासवमाध्वीकाः पुष्पासवफलासवाः।
वासचूर्णैश्च विविधैर्मृष्टास्तैस्तैः पृथक् पृथक् ॥ **5.11.23** ॥

सन्तता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः।
हिरण्मयैश्च कलशैर्भाजनैः स्फाटिकैरपि ॥ **5.11.24** ॥

जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता।
राजतेषु च कुम्भेषु जाम्बूनदमयेषु च ॥ **5.11.25** ॥

पानश्रेष्ठां तथा भूमिं कपिस्तत्र ददर्श सः।
सोऽपश्यच्छातकुम्भानि सीधोर्मणिमयानि च ॥ **5.11.26** ॥

तानि तानि च पूर्णानि भाजनानि महाकपिः।
क्वचिदर्धावशेषाणि क्वचित् पीतान्यशेषतः ॥ **5.11.27** ॥

क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह।
क्वचिद् भक्ष्यांश्च विविधान् क्वचित् पानानि भागशः ॥ **5.11.28** ॥

क्वचिदर्धावशेषाणि पश्यन् वै विचचार ह।
शयनान्यत्र नारीणां शून्यानि बहुधा पुनः।
परस्परं समाश्लिष्य काश्चित् सुप्तावराङ्गनाः ॥ **5.11.29** ॥

काचिच्च वस्त्रमन्यस्या अपहृत्योपगुह्य च।
उपगम्याबला सुप्ता निद्राबलपराजिता॥ **5.11.30** ॥

तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम्।
नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम्॥ **5.11.31** ॥

चन्दनस्य च शीतस्य सीधोर्मधुरसस्य च।
विविधस्य च माल्यस्य पुष्पस्य विविधस्य च॥ **5.11.32** ॥

बहुधा मारुतस्तस्य गन्धं विविधमुद्वहन्।
स्नानानां चन्दनानां च धूपानां चैव मूर्छितः॥ **5.11.33** ॥

प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा।
श्यामावदातास्तत्रान्याः काश्चित् कृष्णा वराङ्गनाः॥ **5.11.34** ॥

काश्चित् काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये।
तासां निद्रावशत्वाच्च मदनेन विमूर्छितम्॥ **5.11.35** ॥

पद्मिनीनां प्रसुप्तानां रूपमासीद् यथैव हि।
एवं सर्वमशेषेण रावणान्तः पुरं कपिः।
ददर्श स महातेजा न ददर्श च जानकीम्॥ **5.11.36** ॥

निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः।
जगाम महतीं शङ्कां धर्मसाध्वसशङ्कितः॥ **5.11.37** ॥

परदारावरोधस्य प्रसुप्तस्य निरीक्षणम्।
इदं खलु ममात्यर्थं धर्मलोपं करिष्यति॥ **5.11.38** ॥

न हि मे परदाराणां दृष्टिर्विषयवर्तिनी।
अयं चात्र मया दृष्टः परदारपरिग्रहः॥ **5.11.39** ॥

तस्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः।
निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी॥ **5.11.40** ॥

कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः।
न तु मे मनसा किञ्चिद् वैकृत्यमुपपद्यते॥ **5.11.41** ॥

मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने।
शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम्॥ **5.11.42** ॥

नान्यत्र हि मया शक्या वैदेही परिमार्गितुम्।
स्त्रियो हि स्त्रीषु दृश्यन्ते सदा सम्परिमार्गणे॥ **5.11.43** ॥

यस्य सत्त्वस्य या योनिस्तस्यां तत् परिमार्गते।
न शक्यं प्रमदा नष्टा मृगीषु परिमार्गितुम्॥ **5.11.44** ॥

तदिदं मार्गितं तावच्छुद्धेन मनसा मया।
रावणान्तःपुरं सर्वं दृश्यते न च जानकी॥ **5.11.45** ॥

देवगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान्।
अवेक्षमाणो हनुमान् नैवापश्यत जानकीम्॥ **5.11.46** ॥

तामपश्यन् कपिस्तत्र पश्यञ्श्चान्या वरस्त्रियः।
अपक्रम्य तदा वीरः प्रस्थातुमुपचक्रमे॥ **5.11.47** ॥

स भूयः सर्वतः श्रीमान् मारुतिर्यत्नमाश्रितः।
आपानभूमिमुत्सृज्य तां विचेतुं प्रचक्रमे॥ **5.11.48** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकादशः सर्गः॥